# पाठ - ९
# काले फलति सौभाग्यम्

**सारान्शः**

एकः राजा अतीव बुद्धिमान् प्रजावत्सलः च आसीत्। सः स्वराज्ये कमपि जनं निर्धनं द्रष्टुं न वाञ्छति स्म । तस्य सभायाम् एकः लब्धदत्तः नाम जीर्णवस्त्रधारी निर्धनः प्रविशति । तेन एकवारं राज्ञः प्राणरक्षा अपि कृता आसीत्। लब्धदत्तः विनम्रः आसीत् अतः: किमपि न अयाचत् । राजा तस्मै एक बीजपूरं फलं प्रयच्छति ' स्म। अन्ते तस्य रहस्यम् उद्घाटितम् भवति ।लब्धदत्तः राज्ञा प्रदत्तं फलं गृहीत्वा गच्छति । एकः साधुः लब्धदत्तात् एकेन रूप्यकेण फलं क्रीत्वा राज्ञे समर्पयति । राजा पुनः तत् फलं लब्धदत्ताय प्रयच्छति । पुनः एकः व्यापारी तत् फलं लब्धदत्तात् क्रीणाति, तस्मै एकं वस्त्रयुगलं ददाति पुनः च राज्ञे ददाति । राजा द्वितीयं वारमपि लब्धदत्ताय तत् फलं प्रयच्छति ।पूर्ववत् एव पुनः एका नर्तकी लब्धदत्तात् फलं स्वीकृत्य राज्ञे ददाति । राजा लब्धदत्तम् आह्वयति, फलं च खण्डयितुम् आदिशति । खण्डितात् फलात् रत्नानि अधः पतन्ति । लब्धदत्तः विस्मितः तानि पश्यति । राजा लब्धदत्तस्य सत्यभाषणेन, विनम्रतया, सन्तोषवृत्त्या च प्रसीदति तस्मै च सर्वाणि रत्नानि प्रयच्छति । वस्तुतः साधुः, व्यापारी, नर्तकी सर्वे एव राज्ञा लब्धदत्तस्य परीक्षायै प्रेषिताः आसन् । लब्धदत्तः परीक्षायां सफलः भवति । पुण्यकर्मणां फलम् अवश्यं प्राप्यते परन्तु कालेन एव । अतः नरः धैर्येण पुण्यकर्माणि कुर्वन् जीवेत् ।

**मुख्य बिन्दवः**

प्रस्तुतनाटकस्य कथा संस्कृतवाङ्मयस्य "कथासरित्सागरः" इति प्रसिद्धकथाग्रन्थात् उद्धृता अस्ति । तामेव कथामाधृत्य लिखितं “काले वर्षति पर्जन्यः” इति नामकं नाटकं “सम्भाषण सन्देशः” इति संस्कृतपत्रिकायाः 1999 वर्षस्य नवम्बर मासस्य अंके प्रकाशितम् वर्तते । नाटकस्य लेखकः श्री नी. ना. मध्यस्थः अस्ति । “काले वर्षति पर्जन्यः” इति प्रकाशितस्य मूलशीर्षकस्य परिवर्तनं कृत्वा अत्र “काले फलति सौभाग्यम्” इति नाटकस्य नाम प्रदत्तम् अस्ति। अल्पेन सन्तुष्टः, लोभरहितः, सत्यवादी, निर्धनः लब्धदत्तः स्व् सत्कर्मणां रत्नरूपाणि फलानि समये आगते अलभत ।

**अवगच्छामः**

काले एव वृक्षाः फलन्ति । काले एव वृष्टिः जायते। काले एव भवनस्य निर्माणं भवति । प्रथमे कुद्दालाघाते एव भूतलात् जलं न निस्सरति । क्षेत्रेषु धान्यम् अपि समये एव प्ररोहति अतः अस्माभिः धैर्येण कार्यं करणीयम् । निराशः भूत्वा मध्यमार्गे एव प्रयत्नः न त्यक्तव्यः। परिश्रमेण धैर्येण कथं कार्यं सम्पन्नं भवति तदेव अधोलिखितेन श्लोक माध्यमेन उपस्थापायमः।

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ।।

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।।

अश्वस्य भूषणं वेगो मत्तं स्याद् गजभूषणं ।
चातुर्यम् भूषणं नार्या उद्योगो नरभूषणं ।।

यथा होकेन चक्रेण न रथस्य गतिर्भवेत् ।
एवं परुषकारेण विना दैवं न सिद्ध्यति ।।

**आवश्यकोऽयं ज्ञानम्**

**नाटकम्** –

नाटकं ख्यातवृत्तं स्यात् पंचसंधिसमन्वितम् ।
विलासार्ध्यादिगुणवद्युक्तं नानाविभूतिभिः ।।

सुखदुःखसमुद्भूतिं नानारसनिरन्तरम् ।
पंचादिका दशपरास्तत्रांकाः परिकीर्त्तिताः ।।

नायकः त्यागी कृती कुलीनः सुश्रीको
रूपयौवनोत्साही ।
दक्षोऽनुरक्तलोकः तेजोवैदग्ध्यशीलमन्नेता ।।

-नाटकम् रूपकस्य एकः भेदः तस्य आख्यानं प्रसिद्धम् ऐतिहासिकं पौराणिक वा भवति। तत्र एकः प्रख्यातनायकः भवति । नाटके वीरशृंगारकरुणेषु एकः प्रधानः रसः भवति।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**

'क्तवतु' (तवत्) प्रत्ययः भूतकालिककृत्प्रत्ययः । अयं धातोः परं योज्यते। क्तवतुप्रत्ययान्तपदं न केवलं भूतकालिकक्रियायाः अर्थं व्यक्तं करोति अस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति । यथा- छात्रः गृहं गतवान् (गम् + क्तवतु) = भूतकालिक क्रियापदम् – अगच्छत् 'इति अर्थः ।

**शब्दार्थाः**

**राजसभायाः**= राजदरबार का
**जीर्णवस्त्रधारी** = फटे पुराने कपड़े पहने

**अभिजानन्ति** = पहचानता है
**शयनागारे**= सोने के कक्ष में
**राजदर्शनाकांक्षी** = राजा का दर्शन चाहने वाला
**विक्रीणाति स्म** = बेचता था
**आज्ञापयति** = आज्ञा देता है
**मन्ये**= मानता हूँ

**योग्यतां वर्धयत**
**नान्दी**-नाटकस्य प्रारम्भे विघ्नविनाशाय क्रियमाणा स्तुतिः नान्दीति कथ्यते ।

**सूत्रधारः**-नाटके मंचसंचालनस्य सर्वम् उत्तरदायित्वं यः निर्वहति सः सूत्रधारः कथ्यते ।

**प्रतीहारी**- राजानम् उपगम्य बहिः आगन्तुकस्य वृत्तं यः कथयति स द्वारपालः एव प्रतीहारी कथ्यते ।

**कञ्चुकी**- वयसा वृद्धः गुणी विप्रः, यः अन्तःपुरचरोऽपि भवति सर्वकार्येषु कुशलश्च भवति, स राजभवननिवासी कंचुकी इत्यभिधीयते ।

**विदूषक**- 'कुसुम', 'वसन्त' इत्यादिनाम्ना अभिधीयमानः वेशभावादिभिः हास्यकरः, कलह-प्रेम प्रवीणः, मंचे वर्तमानः विदूषकः इति कथ्यते ।

**आकाशभाषितम्**- आकाशे लक्ष्यं कृत्वा यद् उच्यते तत् आकाशभाषितम् इति ।

**भरतवाक्यम्**- नाटकसमाप्तौ सामाजिकेभ्यः यदाशीःदीयते शुभकामना वा क्रियते तत् भरतवाक्यमिति कथ्यते ।

**नेपथ्यम्**- रंगमंचस्य पृष्ठतः वेश-परिधान-परिवर्तनाय नाटकीयपात्राणां निर्धारितं स्थानं गृहं वा नेपथ्यम् इत्युच्यते ।

**पाठ संप्रेष्यः**
**1.**लब्धदत्तः सत्यवक्ता, अल्पसंतोषी, निर्लोभः, विनम्रः च आसीत्।
**2**.सर्वदा सत्यम् एव जयते।
धैर्येण कार्यं करणीयम् ।
**3**.सत्कर्मणां फलं सदैव शुभं भवति ।
**4**.'अर्थम्' 'के लिये' इति अर्थे विग्रहे पूर्वपदे चतुर्थी भवति।
**5**.अलम् योगे निषेधार्थे तृतीयाविभक्तिः प्रयुज्यते, पर्याप्त्यर्थे च चतुर्थी।
**6**.भूतकालस्य अर्थे 'क्तवतु' प्रत्ययस्य प्रयोगः अपि भवति।
**7**.उपसर्गपूर्वकं धातोः परं क्त्वा स्थाने ल्यप् प्रत्ययः भवति ।
**8**.प्रतीहारी मन्त्री, व्यापारी शब्दाः इन् प्रत्ययान्ताः सन्ति ।
**9.**भू, शक्, आप्, क्री धातूनां रूपाणि ।

**अधिकाङ्कानाम् अर्जनं कथं भवेत्**
- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात्।
- अध्यायस्य समनार्थी पद्य सूक्तयः अपि जानीयात्।

**स्व मूल्याङ्कनम् कुरुत**
- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत।
- परिश्रमः, धैर्यश्च इति विषयं आधृत्य अन्य श्लोक,कथा, नाटकानां वा अन्वेषणं कृत्वा अर्थं लिखत।